# उच्चारणसंशोधने पाणिनीयशिक्षायाः योगदानम्

**प्रदीप पौडेल**

वरिष्ठशोधाध्येता, सं.सं.प्र.

Krishna.prdeep1993@gmail.com

## सारांशः

*प्रादेशिकभिन्नतायाः कारणात् जनानां वर्णोच्चारणे भेदः दृश्यते। देशप्रभावात् जातस्य अस्य भेदस्य वर्णनं पाणिनिना अपि शिक्षायां कृतम्। "यथा सौराष्ट्रिका नारी तक्रँ इत्यभिधीयते" इति। वर्णानाम् उच्चारणस्य अयं देशगतः भेदः वर्णानां निर्दिष्टस्थानं यावत् न बाधते तावत् दोषः इति वक्तुं न शक्यते। परं यदा एतद् उच्चारणं उक्तस्थानात् अतिरिच्य प्रवर्तते तदा तद् दोषयुक्तं भवति। एतादृशदोषाणां कारणमीमांसां कृत्वा योग्यवर्णस्थानस्य ज्ञानेन तस्य परिहारः शक्यः। पाणिनीयशिक्षायां वर्णस्थानानि निर्दिष्टानि। वर्णोच्चारणसन्दर्भे विस्तृतं चिन्तनं तत्र दृश्यते। अस्य चिन्तनस्य अनुसारम् उच्चारणसंशोधने पाणिनीयशिक्षायाः योगदानम् अस्मिन् लेखे प्रतिपादितम् अस्ति।*

## प्रस्तावना

यत्र वर्णस्वराद्युच्चारणप्रकारः उपदिश्यते सा शिक्षा भवति। अकारादिवर्णानां स्थल-करण-प्रयत्नबोधिका अ-कु-ह-विसर्ज्जनीयाः कण्ठ्याः इत्यादिका वा शिक्षा भवति। इयं च शिक्षा षडङ्गेषु अन्यतमा। शब्दानाम् उचितोच्चारणं, स्थानं प्रयत्नं च सर्वे जानीयुः इति अस्य शास्त्रस्य प्रयोजनम्। उक्तं च -

**प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः**
**पुनर्व्यक्तीकरिष्यामि वाचः उच्चारणे विधिम्॥ शिक्षा.२॥**

*अर्थात् लोकप्रसिद्धमपि उच्चारणं शब्दार्थं वा साधूच्चारणबोधरहितैः अबुद्धिभिः शब्दापशब्दज्ञानबोधकं विना ज्ञातुं न शक्यते अतः इदं शास्त्रं तस्मिन् प्रयोजकम् इति।*

**शिक्षाशब्दस्य निष्पत्तिः त्रिधा भवति** –

यद्यपि शिक्षाशब्दस्य विभिन्नेषु प्रसङ्गेषु विभिन्नाः अर्थाः सम्भवन्ति तथापि व्याकरणशास्त्रसम्बद्धार्थपरकस्य शिक्षाशब्दस्य व्युत्पत्तिः ग्रहणीया उचिता च।

१. **शिक्ष विद्योपादाने** *(अभ्यासे च)*[1] इति धातोः **गुरोश्च हलः**[2] इति सूत्रेण अ-प्रत्ययेन शिक्षाशब्दस्य निष्पत्तिः भवति। अस्य शिक्ष्यते अनया सा शिक्षा इति व्युत्पत्तिर्भवति। अत्र शिक्षा अर्थात् काचित् संज्ञा कस्यचिद् विषयस्य पुनः पुनः अभ्यासः विद्यायाः अर्जनं चेति अर्थः भवति।

२. सन्-प्रत्ययान्तस्य **शक्लृ शक्तौ**[3] इति धातोः **अ प्रत्यायात्**[4] इति सूत्रेण अप्रत्ययात् अपि शिक्षाशब्दस्य निष्पत्तिः भवति। अस्य शक्तुम् इच्छा शिक्षा इति अर्थः भवति।

---

[1] भौवादिक-धातुः।

[2] पा.सू ३ – ३ - १०४

[3] स्वादिस्थः धातुः।

[4] पा.सू. ३ – ३ - १०२

३. तथैव सन्प्रत्ययान्तस्य **शक मर्षणे**[5] (मर्षणं नाम क्षमा) इति धातोः अपि पूर्ववत् भावे अप्रत्ययेन शिक्षाशब्दस्य निष्पत्तिः भवति। अस्य शिक्षाशब्दस्य शक्तुम् इच्छा इत्येव अर्थः भवति। अत्र शिक्षा नाम क्षमाकरणम्।

यद्यपि एतासु व्युत्पत्तिषु पाणिनीयशिक्षानुसारं प्रारम्भिकं व्युत्पत्तिद्वयमेव संघटते । किन्तु अत्र संज्ञाबोधकस्यापि शिक्षाशब्दस्य अपेक्षा वर्तते, शिक्षा नाम शिक्षाग्रन्थः। यतः अयं च शिक्षाशब्दः न केवलं यौगिकः अपि तु रूढोऽपि वर्तते। यथा – **यथा शीक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा बलम्। साम सन्तानः। इत्युक्तः शीक्षाध्यायः इति**[6] इति एतेषु अर्थेषु अपि शिक्षाशब्दस्य प्रयोगः दृश्यते एव । अत्र वर्णः इत्यनेन अकारादिहान्तपर्य्यन्ताः वर्णाः गृह्यन्ते । स्वरः इत्यनेन उदात्तानुदात्तस्वरिताः इति एतेषां ग्रहणं वर्तते । पुनश्च मात्रा नाम ह्रस्वदीर्घादिमात्राः । बलम् – बाह्याभ्यन्तरप्रयत्नाः बले अन्तर्भवन्ति। साम इत्यनेन उच्चारणे समत्वम् इति अभिप्रायः वर्तते। यथा -

**योऽसौ मात्रा पूर्वोत्तररूपे अन्तरेण सन्धिविज्ञपनी साम तद् भवति।**[7] सन्तानो नाम पदशब्दवाक्यवर्णानां विस्तरादिवृद्धिः इति अस्ति।

अतः एतान् शिक्षासम्बद्धान् प्रयोगान् दृष्ट्वा प्रथमः एव शिक्षाशब्दः ग्रहणीयः।

यस्य कस्यचिदपि विषयस्य येन शिक्षणम् अभ्यासकरणं च इति अर्थः भवति। अत्र शुद्धोच्चारणस्य पुनः पुनः प्रयत्नः शिक्षणरूपायाः विद्यायाः अर्ज्जनं च इत्याद्यर्थः विषयेण सह संगच्छते अपि। अतः शिक्षा इत्यत्र शिक्ष्यते अनया इति व्युत्पत्तिः शिक्ष अभ्यासे इति धातुः करणे **अ-प्रत्ययः** च वर्तते।

**पाणिनीयशिक्षानुसारेण वर्णाः वर्णसंख्याः च -**


वर्णयति इति वर्णः, वर्णधातोः अच्-प्रत्ययेन निष्पन्नस्य वर्णशब्दस्य अक्षरम् इति अर्थः वर्तते।

संस्कृतवाङ्मये आहत्य चतुषष्टिवर्णाः सन्ति -

**त्रिषष्टिश्चतुषष्टिर्वा वर्णाः शम्भुमते मताः।**
**प्राकृते संस्कृते चापि स्वयं प्रोक्ता स्वयम्भुवा॥ शिक्षा – ३॥**

अर्थात् वैदिकभाषायां लौकिकभाषायां च आहत्य त्रिषष्टिः चतुषष्टिः वा वर्णाः सन्ति।

ते च वर्णाः क्रमशः एतानि सन्ति –




[5] दौ…
[6] तै…
[7] ऐ… 3.1.5.6 ।

इति एते वर्णाः सन्ति । एतेषु प्लुतलृकारः अस्ति इति अनुमन्यते तर्हि चतुषष्टिवर्णाः भवन्ति । यदि न अनुमन्यते तर्हि त्रिषष्टिवर्णाः भवन्ति । एतेषुः चत्वारः यमाः केवलं वेदे एव भवन्ति । ते च यमाः यदा पञ्चमाः अनुनासिकवर्णाः परतः भवन्ति तदा ततः पुर्व्वविद्यमानयोः ककारयोः खकारयोः वा मध्ये द्वितीयः ककारः यमः भवति । यथा पलिक्कनी अत्र द्वितीयः ककारः यमः । उक्तं च -

**वर्गेषु आद्यानां चतुर्णां पञ्चमे परे मध्ये यमो नाम पूर्वसदृशः वर्णः प्रातिशाख्ये प्रसिद्धः । यथा पलिक्क्नीः, चख्ख्नतुः, अग्ग्निः, घ्घ्नन्तीत्यत्र क्रमेण कखगघेभ्यः परे तत्सदृशाः एव यमाः ।**[8]

एतेषां वर्णानां स्वस्वसंज्ञाः स्थानानि च सन्ति । एतेषां वर्णानाम् उत्पत्यनुसारं नाम अपि वर्तते ।

शिक्षाधारेण वर्णोत्पत्तिः -

**आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया।**
**मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ।। शिक्षा. ६ ।।**
**मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम् ।**

[8] सिद्धान्तकौमुदी - पूर्वत्रासिद्धम् इति सूत्रे ।

**प्रातःसवनयोगं तं छन्दो गायत्रमाश्रितम् ॥ ७ ॥**

**कण्ठे माध्यान्दिनयुगमध्यमं त्रैष्टुभानुगम् ।**

**तारं तातीर्यसवनं शीर्षण्यं जागतानुगम् ॥ ८ ॥**

**सोदीर्णो मूर्धन्यभिहतो वक्त्रमापद्य मारुतः**

**वर्णाञ्जनयते ................................ ॥९॥**

आत्मा बुद्ध्या सह बाह्यान् अर्थान् समेत्य मनसः नियुक्तिं करोति । नियुक्तं मनः जठराग्निं ताडयति । ताडितः जठराग्निः मारुतनामकं प्राणवायुं त्यजति । पुनः सः वायुः हृद्देशे विचरन् मन्द्रस्वरम् उत्पादयति । इति अस्य भावः । मन्द्रस्वरो नाम गम्भीरध्वनिः ।

सः ऊर्ध्वमुखी वायुः यदा वेगेन उपरि मूर्धानं यावत् गच्छति तदा सः तस्यावरोधकारणात् पुनः अधः आयाति । अधोदिशं प्रत्यागच्छन् वायुः नासिकया बहिः आगच्छति । बहिः आगच्छन् वायुः तत्तत् स्थानस्पर्शैः अकारादिहान्तसमुदायघटकान् (अ..... इ.....क.... ख.... ह) इत्येतान् वर्णान् जनयति । वायोः वेगकारणात् जिह्वायाः ओष्ठयोः च यत्र यत्र स्पर्शः भवति । तस्य वर्णस्य तत्-तत् स्थानमिति स्थानविभागस्य मूलम् ।

उच्चारणदृष्ट्या हृदयात् मूर्धपर्यन्तं स्थानम् उरः, कण्ठः शिरः च इति त्रिधा विभज्यते । एतेषु उरोभागात् मन्द्रस्वरस्य निष्पत्तिः भवति । उरसि विचरन् वायुः यं मन्द्रस्वरं जनयति सः स्वरः प्रातःसवनकर्मणि[9] उपयज्यते । यथा प्रातःकाले गायत्रीच्छन्दसः पाठः भवति तथैव अस्य स्वरस्य अपि उच्चारणं भवति । सः एव वायुः कण्ठप्रदेशे विचरन् यं स्वरम् उत्पादयति सः मध्यमस्वरः (मन्द्रतारयोः मध्यवर्ती) भवति । अयं मध्यमस्वरः मध्याह्नकालीने सवनकर्मणि उपयुज्यते । अस्य उच्चारणं त्रिष्टुप्छन्दः इव भवति । पुनश्च सः एव वायुः मूर्धविवरं प्रविश्य शिरोदेशं परिभ्रमन् यं स्वरम् उत्पादयति सः तारः इति कथ्यते । अस्य उपयोगः सायङ्कालीने सवनकर्मणि भवति । अस्य उच्चारणं जगतीच्छन्दोनुसारं भवति । वर्णानां जननात् पूर्वं त्रिधा मन्द्रमध्यमतारस्वरविभागं भरतमुनिरपि नाट्यशास्त्रे उक्तवान् –

**सर्वेषामप्येषां मन्द्रमध्यतारकृतः प्रयोगस्त्रिस्थानगतः । तत्र दूरस्थाभाषणे तारं शिरसा नातिदूरे मध्यं कण्ठेन, पार्श्वतो मन्द्रमुरसा प्रयोजयेत् इति पाठ्यम् इति ।**[10]

*एवम् अवगन्तुं शक्यते -*

| **स्वरनाम** | **स्थानम्** | **कर्म** | **उच्चारणम्** |
|---|---|---|---|
| मन्द्रस्वरः | उरःस्थानम् | प्रातःकालीनसवनम् | गायत्रीसदृशः |
| मध्यमस्वरः | कण्ठस्थानम् | मध्याह्नकालीनसवनम् | त्रिष्टुप्सदृशः |
| तारस्वरः | शिरःस्थानम् | सायङ्कालीनसवनम् | जगतीच्छन्दः |

उक्तरीत्या उत्पन्नानां सर्वेषामपि वर्णानामपि पञ्चधा विभागः भवति । स्वरः, कालः, स्थानम्, प्रयत्नः, अनुप्रदानम् ।

अत्र स्वरः नाम उदात्त-अनुदात्त-स्वरितभेदः । कालश्च ह्रस्वदीर्घप्लुताख्यः । स्थानम् – कण्ठादिवर्णस्थानम् । प्रयत्न-अनुपदानौ - बाह्याभ्यन्तरप्रयत्नौ ।


[9] सवनकर्म अर्थात् यज्ञस्नानकर्म

[10] नाट्यशास्त्रम् - 17.130 ।

*उत्पन्नानां वर्णानां स्थानम् अत्र एवं विभाजयितुं शक्यते -*

अत्र वायोः आघातकारणेन वर्णानां स्थानानि परिवर्तन्ते। तदनुसारं दर्शितम् इदं चित्रम्।

## वर्णानाम् उच्चराणस्थानानि




***उच्चारणगतदोषाः***

प्रादेशिकभिन्नतायाः कारणात् जनानां वर्णानाम् उच्चारणे भेदः दृश्यते। देशप्रभावात् जातस्य अस्य भेदस्य वर्णनं पाणिनिना अपि शिक्षायां कृतम्। "यथा सौराष्ट्रिका नारी तक्रँ इत्यभिधीयते" इति। देशगतः वर्णानाम् उच्चारणस्य अयं भेदः वर्णानां निर्दिष्टस्थानं यावत् न बाधते तावत् दोषः इति वक्तुं न शक्यते। परं यदा एतद् उच्चारणं उक्तस्थानात् अतिरिच्य प्रवर्तते तदा तद् दोषयुक्तं भवति। एतादृश दोषाणां कारणमीमांसां कृत्वा योग्यवर्णस्थानस्य ज्ञानेन तस्य परिहारः शक्यः। पाणिनीयशिक्षायां न केवलं वर्णस्थानानि निर्दिष्टानि अपि तु तेषाम् उच्चारणदोषाणाम् अपि चिन्तनं कृतं दृश्यते।

**न कराली न लम्बोष्ठो नाव्यक्तो नानुनासिकः**

**गद्गदो बद्धजिह्वश्च न वर्णान्वक्तुमर्हसि ॥**[11]

अर्थात् उन्नतदन्तः (दन्तुरः) दीर्घोष्ठः, अव्यक्तः, अनुनासिकः, गद्गदः बद्धजिह्वः च वर्णान् यथारूपम् उच्चारयितुं न शक्नोति। अत्र कारणं मुखस्य संरचना वयोवस्थाः (बालत्वम्) च भवितुम् अर्हति।

उक्तदोषयुक्ताः जनाः वर्णान् निर्दुष्टतया वक्तुम् न शक्नुवन्ति। यथा बालानां जिह्वा स्थूला भवति इति कारणेन रेफस्य उच्चारणं सम्यक् न भवति। यथा रामः इति उच्चारणप्रसङ्गे लामः इति उच्चार्यते। पुनश्च प्रतिपदं सुस्पष्टतया उच्चारणीयम्। पदानाम् उच्चारणसन्दर्भे उक्तमपि -

**गीती शीघ्री शिरःकम्पी यथा लिखितपाठकः**

11 याज्ञवल्क्यशिक्षा, 26

**अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ।। शिक्षा. - ३२ ।।**

वर्णानाम् उच्चारणे अन्यान्यभाषायाः प्रभावः अपि आधिक्येन दृश्यते । यद्यपि संस्कृतभाषायाः उपयोक्तारः प्रतिप्रसङ्गं विभिन्नाः भवन्ति । ज्ञाने सत्यपि वयं प्रभावात् न निर्गताः ।

*यथा कानिचन उदाहरणानि पश्यामः –*

१- अनुस्वारः – अनुस्वारः इति एषः आनुनासिक्यवर्णः विद्यते । स्वराद् अनन्तरं व्यञ्जनात् पूर्वं च अस्य उच्चारणं भवति । अस्य उच्चारणप्रसङ्गे कण्ठप्रदेशात् निर्गतः वायुः केवलं नासिकां स्पृशन् बहिः आगच्छति । किन्तु फारसिवर्णमालायां आङ्ग्लवर्णमालायां च अनुस्वारार्थं नकारः मकारो वा लिख्यते । अस्य परिणामेन एव उत्तरभारते अनुस्वारः नकाररूपं प्राप्तवान् पुनश्च दक्षिणभारते मकाररूपं प्राप्तवान् । यथा उच्चारणे – अंशः इति अनुस्वारयुतं पदम् अस्ति । किन्तु कुत्रचित् इदम् अन्शः कुत्रचित् अम्शः इति वा उच्चार्यते ।

२. फ – फ़ अत्र फकारः ओष्ठ्यवर्णः वर्तते । अस्य उच्चारणं पयः पशुः इत्यादिषु यथा पकारस्य उच्चारणं भवति तथैव अस्यापि भवति । किन्तु पूर्वभाषायाः प्रभावेण फलम् इत्यस्य फ़लम् इति उच्चारणं लेखनं च न युक्तम् । अस्य ध्वनिः महाप्राणः ओष्ठवर्णसदृशः च भवेत् ।

३. हकारघटितं संयुक्ताक्षरम् – हकारः ण्, न्, म्, य्, व्, र्, ल् । इति केवलैः एतैः वर्णैः सह एव संयुक्तः भवति ।

**यथा – अपराह्णः, मध्याह्नः, ब्रह्म, बाह्यम्, आह्वानम्, ह्रस्वः, प्रह्लादः ।** इति एतेषु स्थलेषु हकारस्य पूर्वोच्चारणम् एव उचितम् । ब्रम्हः रस्वः इत्याद्युच्चारणं परिहरणीयम् ।

४. स – श – ष

प्रायः बहुभिः अनवधानकारणात् 'स' 'श' 'ष' इत्येतेषां वर्णानाम् उच्चारणे दोषः क्रियते एव ।

षकारस्य सकारः शकास्य सकारः वा उच्चारणं भवति ।

तदर्थं सम्यक् उच्चारणं वयम् एवं ज्ञातुं शक्नुमः –

वारं वारं त थ ध न इति वर्णानाम् उच्चारणं करणीयम् । अत्र यदा तकारस्य उच्चारणप्रसङ्गे जिह्वायाः स्पर्शः यत्र वर्तते तदनुसारं सकारस्य अपि उच्चारणं करणीयम् । त थ द ध **स**, त, थ, द, ध, **स** । इत्येवं रूपेण अभ्यासः कर्तुं शक्यते । तथैव **वस्त्रम्, स्त्री, स्तम्भः, स्थानम्, स्थितिः ।** इति एतादृशानि स्थलानि सन्ति यत्र सकारस्य उच्चारणार्थं प्रयासः करणीयः न भवति। अनायासेन उच्चारणं भवति । अत्र षकारस्य शकारस्य वा उच्चारणं भवितुं न शक्नोति । एवमेव अन्यत्रापि उच्चारणं करणीयम् ।

तथैव शकारस्य विषयेऽपि 'च छ ज झ' इत्येतेषां वर्णानाम् उच्चारणस्थानम् अवगन्तव्यम् । अर्थात् जिह्वायाः स्पर्शः कुत्र भवति इति अवगन्तव्यम् । तदन्तरम् 'च छ ज झ श' 'च छ ज झ - श' इत्येवं रूपेण अभ्यासः करणीयः ।

एवमेव **पश्चात्, पश्चिमा, पश्यति, कश्यपः** इत्यादिषु स्थलेषु अपि उच्चारणसन्दर्भे प्रयत्नः न करणीयः भवति । अत्रापि शकारस्य शकारः एव उच्चारितः भवति । षकारः सकारो वा न भवति ।

एवमेव ट, ठ, ड, ढ, इत्यादीनां वर्णानाम् उच्चारणस्थानम् अवगत्य ट, ठ, ड, ढ – ष । ट, ठ, ड, ढ – ष । इत्येवं रूपेण प्रयत्नः करणीयः । तथैव **विष्णुः, धृष्टता, प्रष्टा, अङ्गुष्ठः, कृष्णः** इति एतादृशानि स्थलानि सन्ति यत्र भिन्नसकारादिनाम् उच्चारणं न सम्भवति । एतैः पदैः वा अपि अभ्यासः कर्तुं शक्यते ।

एवं वर्णज्ञानबोधकं पाणिनीयशिक्षाशास्त्रम् अधीयानाः वयं सुष्ठूच्चारणस्य प्रयत्नं साधयामः । यतः –

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।**[12]

*अस्मिन् लोके तादृशं ज्ञानं न विद्यते यत् शब्दं विना अनुगमनं भवेत् । अतः सर्वविधं ज्ञानं शब्देन सह युक्तमिव भासते । शब्दादृते किमपि ज्ञानं न विद्यते इति यावत्*

********************

**सन्दर्भग्रन्थाः** –

१. पाणिनीयशिक्षा - भाष्यकृत् बच्चुलाल अवस्थी । प्रकाशकः - श्रीनिवासरथः उज्जयिनीस्थः कालिदास-आकादेमी-निदेशकः विक्रमसंवत् २०५०

२. धातुपाठः - धातुरूपनन्दिनी । जनार्दन हेगडे । प्रकाशिका संस्कृतभारती- नवदेहली ।

३. पाणिनीयाष्टाध्यायी - दीक्षितपुष्पाकृत-प्रकरणनिर्देशः अष्टाध्यायीसूत्रपाठः । प्रकाशिका – संस्कृतभारती नवदेहली । Second print Oct. - 2016 ।

४. नाट्यशास्त्रम् – भरतमुनिप्रणित नाट्यशास्त्र published by 1981 Banaras Hindu University. Varanasi.

५. सिद्धान्तकौमुदी - वैयाकरणसिद्धान्तकौमुदी । प्रकाशकः चौखम्बा सुरभारती प्रकाशन वाराणसी

६. तैत्तिरियोपनिषत् - एकादशोपनिषद् – विद्यामार्तण्ड डा. सत्यव्रत सिद्धान्तालंकार । प्रकाशकः विजयकृष्ण लखनपाल डब्ल्यू - ७७ ए ग्रेटर कैलाश- १ नई दिल्ली – ४८

७. वाक्यपदीयम् ब्रह्मकाण्डम् - प्रकाशकः - चौखम्बा संस्कृत संस्थानम् गोपाल मन्दिर लेन (गोलघर समीप मैदागीन) वाराणसी

12 वाक्यपदीयम् - 123